श्री सरस्वती दशश्लोकी स्तुतिः

श्री सरस्वती दशश्लोकी स्तुतिः

ऋषय ऊचुः |
कथं सारस्वतप्राप्तिः केन ध्यानेन सुव्रत |
महासरस्वती येन तुष्टा भवति तद्वद || 1 ||

अश्वलायन उवाच |
शृण्वंतु ऋषयः सर्वे गुह्याद्गुह्यतमं महत् |
दशश्लोकीस्तुतिमिमां वदामि ध्यानपूर्वकं || 2 ||

ध्यानं –
अंकुशं चाक्षसूत्रं च पाशं पुस्तं च धारिणीं |
मुक्ताहारैः समायुक्तां देवीं ध्यायेच्चतुर्भुजां || 3 ||

सितेन दर्पणाभेन वक्त्रेण परिभूषितां |
सुस्तनीं वेदिमध्यां तां चंद्रार्धकृतशेखरां || 4 ||

जटाकलापसंयुक्तां पूर्णचंद्रनिभाननां |
त्रिलोचनीं महादेवीं स्वर्णनूपुरधारिणीं || 5 ||

कटकस्वर्णरत्नाढ्यमहावलयभूषितां |
कंबुकंठीं सुताम्रोष्टीं सर्वाभरणभूषितां || 6 ||

केयूरैर्मेखलाद्यैश्च द्योतयंतीं जगत्त्रयं |
शब्दब्रह्मारणिं ध्यायेद्ध्यानकामः समाहितः || 7 ||

वक्ष्ये सारस्वतं स्तोत्रं वाक्प्रवृत्तिकरं शुभं |
लक्ष्मीविवर्धनं चैव विवादे विजयप्रदं || 8 ||

परब्रह्मात्मिकां देवीं भुक्तिमुक्तिफलप्रदां |
प्रणम्य स्तौमि तामेव ज्ञानशक्तिं सरस्वतीं || 9 ||

स्तुतिः –

या वेदांतोक्ततत्त्वैकस्वरूपा परमार्थतः |
नामरूपात्मिका व्यक्ता सा मां पातु सरस्वती || 10 ||

या सांगोपांगवेदेषु चतुर्ष्वेकैव गीयते |
अद्वैता ब्रह्मणः शक्तिः सा मां पातु सरस्वती || 11 ||

या वर्णपदवाक्यार्थस्वरूपेणैव वर्तते |
अनादिनिधनानंता सा मां पातु सरस्वती || 12 ||

अध्यात्ममधिदेवं च देवानां सम्यगीश्वरी |
प्रत्यगात्मेव संती या सा मां पातु सरस्वती || 13 ||

अंतर्याम्यात्मना विश्वं त्रैलोक्यं या नियच्छति |
रुद्रादित्यादिरूपस्था सा मां पातु सरस्वती || 14 ||

या प्रत्यग्दृष्टिभिर्ज्ञानैर्व्यज्यमानानुभूयते |
व्यापिनी ज्ञप्तिरूपैका सा मां पातु सरस्वती || 15 ||

नामजात्यादिभिर्भेदैरष्टधा या विकल्पिता |
निर्विकल्पात्मिका चैव सा मां पातु सरस्वती || 16 ||

व्यक्ताव्यक्तगिरः सर्वे देवाद्या व्याहरंति यां |
सर्वकामदुघा धेनुः सा मां पातु सरस्वती || 17 ||

यां विदित्वाखिलं बंधं निर्मथ्यामलवर्त्मना |
योगी याति परं स्थानं सा मां पातु सरस्वती || 18 ||

नामजात्यादिकं सर्वं यस्यामाविश्य तां पुनः |
ध्यायंती ब्रह्मरूपैका सा मां पातु सरस्वती || 19 ||

फलश्रुतिः –

यः कवित्वं निरातंकं भुक्तिं मुक्तिं च वांछति |
सोऽभ्यर्च्यैनां दशश्लोक्या भक्त्या स्तौतु सरस्वतीं || 20 ||

तस्यैवं स्तुवतो नित्यं समभ्यर्च्य सरस्वतीं |
भक्तिश्रद्धाभियुक्तस्य षण्मासात् प्रत्ययो भवेत् || 21 ||

ततः प्रवर्तते वाणी स्वेच्छया ललिताक्षरा |
गद्यपद्यात्मिका विद्या प्रमेयैश्च विवर्तते || 22 ||

अश्रुतो बुध्यते ग्रंथः प्रायः सारस्वतः कविः |
श्रुतं च धारयेदाशु स्खलद्वाक् स्पष्टवाग्भवेत् || 23 ||

प्रख्यातः सर्वलोकेषु वाग्मी भवति पूजितः |
अजितः प्रतिपक्षाणां स्वयं जेताऽधिजायते || 24 ||

अयोध्यैर्वेदबाह्यैर्वा विवादे प्रस्तुते सति |
अहं वाचस्पतिर्विष्णुः शिवो वास्मीति भावयेत् || 25 ||

एवं भावयता तेन बृहस्पतिरपि स्वयं |
न शक्नोति परं वक्तुं नरेष्वन्येषु का कथा || 26 ||

न कांचन स्त्रियं निंदेत् न देवान्नापि च द्विजान् |
अनार्यैर्नाभिभाषेत सर्वत्रैव क्षमी भवेत् || 27 ||

सर्वत्रैव प्रियं ब्रूयात् यथेच्छालब्धमात्मनः |
श्लोकैरेव तिरस्कृत्य द्विषंतं प्रतिवादिनं || 28 ||

प्रतिवादिगजानां तु सिंहो भवति तद्वचः |
यद्वागितिद्व्यृचेनैव देवीं योऽर्चति सुव्रतः |
तस्य नासंस्कृता वाणी मुखादुच्चारिता क्वचित् || 29 ||

प्रथमं भारती नाम द्वितीयं च सरस्वती |
तृतीयं शारदा देवी चतुर्थं कंसमर्दनी || 30 ||

पंचमं तु जगन्माता षष्ठं चैव तु पार्वती |
सप्तमं चैव कामक्षी ह्यष्टमं ब्रह्मचारिणी || 31 ||

नवमं चैव वाराही दशमं ब्रह्मपुत्रिका |
एकादशं च वाग्देवी द्वादशं वरदांबिका || 32 ||

द्वादशैतानि नामानि त्रिसंध्यं यः पठेन्नरः |
तस्य सारस्वतं चैव षण्मासेनैव सिध्यति || 33 ||

यस्याः स्मरणमात्रेण वाग्विभूतिर्विजृंभते |
सा भारती प्रसन्नाक्षी रमतां मन्मुखांबुजे || 34 ||

इत्याश्वलायनमुनिर्निजगाद देव्याः
स्तोत्रं समस्तफलभोगनिधानभूतं |
एतत् पठन् द्विजवरः शुचितामुपैति
संध्यासु वांछितमुपैतिन संशयोऽत्र || 35 ||

इति अश्वलायन प्रोक्त श्री सरस्वती दशश्लोकी स्तुतिः ||